# Brahmaproktam Vishnu Stotram

# બ્રહ્મપ્રોક્તં વિષ્ણુસ્તોત્રમ્

## Document Information

Text title : Brahmaproktam Vishnu Stotram

File name : brahmaproktaMviShNustotram.itx

Category : vishhnu, vishnu, mahAbhArata, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : mahAbhArata | bhIShmaparva | adhyAya 62/13-23||

Latest update : November 2, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 2, 2025

*sanskritdocuments.org*

# બ્રહ્મપ્રોક્તં વિષ્ણુસ્તોત્રમ્

અજેયૌ સમરે યત્તૌ સહિતાવમરૈરપિ ।
મૂઢાસ્ત્વેતૌ ન જાનન્તિ નરનારાયણાવૃષી ॥ ૧૨॥

તસ્યાહમાત્મજો બ્રહ્મા સર્વસ્ય જગતઃ પતિઃ ।
વાસુદેવોઽર્ચનીયો વઃ સર્વલોકમહેશ્વરઃ ॥ ૧૩॥

તથા મનુષ્યોઽયમિતિ કદાચિત્સુરસત્તમાઃ ।
નાવજ્ઞેયો મહાવીર્યઃ શઙ્ખચક્રગદાધરઃ ॥ ૧૪॥

એતત્પરમકં ગુહ્યમેતત્પરમકં પદમ્ ।
એતત્પરમકં બ્રહ્મ એતત્પરમકં યશઃ ॥ ૧૫॥

એતદક્ષરમવ્યક્તમેતત્તચ્છાશ્વતં મહત્ ।
એતત્પુરુષસંજ્ઞં વૈ ગીયતે જ્ઞાયતે ન ચ ॥ ૧૬॥

એતત્પરમકં તેજ એતત્પરમકં સુખમ્ ।
એતત્પરમકં સત્યં કીર્તિતં વિશ્વકર્મણા ॥ ૧૭॥

તસ્માત્સર્વૈઃ સુરૈઃ સેન્દ્રૈર્લોકૈશ્ચામિતવિક્રમઃ ।
નાવજ્ઞેયો વાસુદેવો માનુષોઽયમિતિ પ્રભુઃ ॥ ૧૮॥

યશ્ચ માનુષમાત્રોઽયમિતિ બ્રૂયાત્સુમન્દધીઃ ।
હૃષીકેશમવજ્ઞાનાત્તમાહુઃ પુરુષાધમમ્ ॥ ૧૯॥

યોગિનં તં મહાત્માનં પ્રવિષ્ટં માનુષીં તનુમ્ ।
અવમન્યેદ્વાસુદેવં તમાહુસ્તામસં જનાઃ ॥ ૨૦॥

દેવં ચરાચરાત્માનં શ્રીવત્સાઙ્કં સુવર્ચસમ્ ।
પદ્મનાભં ન જાનાતિ તમાહુસ્તામસં જનાઃ ॥ ૨૧॥

કિરીટકૌસ્તુભધરં મિત્રાણામભયઙ્કરમ્ ।
અવજાનન્મહાત્માનં ઘોરે તમસિ મજ્જતિ ॥ ૨૨॥

એવં વિદિત્વા તત્ત્વાર્થં લોકાનામીશ્વરેશ્વરઃ ।
વાસુદેવો નમસ્કાર્યઃ સર્વલોકૈઃ સુરોત્તમાઃ ॥ ૨૩॥

ઇતિ મહાભારતે ભીષ્મપર્વણિ ૬૨ અધ્યાયાન્તર્ગતં
બ્રહ્મપ્રોક્તં વિષ્ણુસ્તોત્રં સમ્પૂર્ણમ્ ।

મહાભારત । ભીષ્મપર્વ । અધ્યાય ૬૨/૧૩-૨૩॥

mahAbhArata . bhIShmaparva . adhyAya 62/13-23..

Proofread by PSA Easwaran

*Brahmaproktam Vishnu Stotram*
pdf was typeset on November 2, 2025

Please send corrections to *sanskrit@cheerful.com*